# संस्कृतवार्ताः

दिनाङ्क :- 17.06.2025

प्रात: - 06:55

प्रधानमन्त्री-कनाडा

प्रधानमन्त्री नरेन्द्रमोदी अद्य सायं कनाडादेशस्य कनानास्किस्-नगरे G-7 शिखर-सम्मेलने भागं गृह्णाति। श्री मोदिन: G-7 शिखर-सम्मेलने अविरतं षष्ठं वारं सहभागो वर्तते। कनाडादेशस्य प्रधानमन्त्री मार्क् कार्नी इत्यस्य आमन्त्रणेन श्रीमोदी स्वाधिकारिकयात्रावधौ शिखर-सम्मेलनस्य पश्चात् अनेकैः राष्ट्राध्यक्षैः सह द्विपक्षीय वार्तामपि करिष्यति।

प्रधानमन्त्री G-7 राष्ट्राणां नेतृभिः, अन्यैः आमन्त्रित-देशैः च अन्तार्राष्ट्रीय-संस्थाभ्यः च आगतानां अध्यक्षैः सह वैश्विकमहत्त्वपूर्णविषयेषु विचारविनिमयं करिष्यति। एतेषु विषयेषु ऊर्जासुरक्षा, प्रविधिः, नवोन्मेषः, विशिष्टतया कृत्रिमबुद्धिमता-ऊर्जा सम्बन्धः, क्वान्टम्-संबद्धविषयाः च प्रमुखं स्थानं भजन्ते।

पीएम-योग-क्रोएशिया

क्रोएशियादेशे योगस्य लोकप्रियता वर्धमाना वर्तते, अपि च तत्रत्य जनानां जीवने सम्प्रति योगः अंगभूतो वर्तते। एतस्मिन्नेव क्रमे प्रधानमन्त्री नरेन्द्रमोदी स्वदेशस्य द्विपक्षीयसम्बन्धान् सुदृढीकर्तुं श्वः क्रोएशियादेशं प्रति यास्यति। त्रयाणां राष्ट्राणां यात्रायाः तृतीयं च अन्तिमं चरणं श्व: सम्पत्स्यते यस्मिन् श्रीमोदी श्वः अपराह्णे क्रोएशियायाः ज़ग्रेब्-नगरं गमिष्यति। क्रोएशिया देशे भारतीय प्रधानमन्त्रिणः एषा प्रथमा यात्रा वर्तते। अन्तार्राष्ट्रीययोगदिवसस्य समयः समीपे एव अस्ति, अतः प्रधानमन्त्रिणः क्रोएशियायाः यात्रा सुष्ठु: प्रतीयते। ज़ग्रेब्-नगरं तस्य स्वागतं कर्तुं सज्जं वर्तते।

गडकरी-परिवहन

भारतस्य नैकेषु प्रदेशेषु द्विसहस्रं वाहनसञ्चालनप्रशिक्षणविद्यालयानां स्थापनां कर्तुं भारतसर्वकारेण निर्णयो विहितः। नवदिल्ल्यां एकस्मिन् कार्यक्रमे वदन्, केन्द्रीय-पथ-परिवहन-राजमार्गमन्त्रिणा नितिनगडकरी-इत्यनेन उक्तं यत्, एते प्रशिक्षणविद्यालयाः देशस्य वंचित-जनपदेषु जनजातीय-प्रदेशेषु च स्थापयिष्यन्ते, येन युवान: वृत्यवसरानि च प्राप्स्यन्ति।

ईरान-परमाणुसन्धिः

इजरायल-देशेन सह संवर्धमानस्य द्वन्द्वस्य मध्ये ईरानः परमाणु-अप्रसार-सन्धेः निवृत्तेः योजनां अकरोत्। राष्ट्रपतिः मसूद पेजेश्कियनः अवदत् यत् ईरानस्य संसदः परमाणुसन्धेः निवृत्तेः विधिनिर्माणं कुर्वदस्ति। राष्ट्रपतिः तेहरानस्य वृत्तं पुनरुक्तवान् यत् तस्य परमाणुशस्त्राणां विकासस्य योजना नास्ति, तथा च ईरानस्य परमाणुक्रियाकलापाः शान्तिपूर्णतया ऊर्जायाः अनुसन्धानस्य च विषये केन्द्रीकृताः एव सन्ति इति रेखांकितवान्।

ईरान-इस्राइल

ईरान्-इजरायलयोः अविवेकिरूपेण परस्परं क्षेपणास्त्रं प्रहार्यते। एतेषु आक्रमणेषु उभयदेशेषु शतशः जनाः मृताः, बृहत् विनाशः अपि अभवत्। गतरात्रौ आक्रमणेषु शतशः इतोपि नागरिकाः मृताः। इरानस्य परमाणु-बैलिस्टिक-क्षेपणास्त्र-कार्यक्रमं लक्ष्यीकृत्य इजरायल्-देशस्य आक्रमणानां प्रतिक्रियारूपेण इरानस्य क्रियान्वयनम् निरन्तरं भवति।

भारतीय ऋतु विज्ञानविभागः

भारतीय ऋतु विज्ञानविभागेन अद्य सौराष्ट्र-कच्छप्रदेशयोः केषुचित् स्थलेषु अतिवृष्टेः सम्भावना प्रकटिता। अरुणाचलप्रदेश, छत्तीसगढ, तटीयकर्णाटक, गङ्गातटीयपश्चिमबङ्गाल, गुजरात, कोङ्कण-गोवा, मध्य-महाराष्ट्र, ओडिशा, पूर्वोत्तर-राज्यानि च, अगामिद्वित्रिदिनेषु अतिवृष्टिं अनुभविष्यन्तीति विभागेन सूचितम्। दिल्ली-एन.सी.आर्-प्रदेशस्य कृते ऽपि एषः विभागः ज्ञापयति यत्, मासस्यास्य अष्टादश दिनाङ्कात् आरभ्य विंशतिदिनाङ्कपर्यन्तं, सौम्य-मध्यम वृष्ट्या सह मेघगर्जनम्, विद्युत्स्फोटश्च भविष्यति।